गोपालनामसहस्र विधानम्

॥ ६७॥

॥ ॐ श्रीगणेशाय नमः ॥ श्रीकृष्णाय नमः
अथ गोपालाऽष्टादशाक्षरी विधानमु
च्यते ॥ श्रीनारद ऋषिः । गायत्री छंदः
श्रीकृष्णो देवता ॥ क्लीं कृष्णाय हृदयं ॥
गोविंदाय शिरः ॥ गोपीजन शिखा । वल्ल
भाय कवचं ॥ स्वाहा अस्त्रम् ॥ अथ ध्या
नं ॥ अव्यान्नीलत्कलाय द्युतिरहि रिपु
पिच्छोल्लसत्केशजालो गोपीनेत्रोत्प
लाराधितललितवपुर्गोपगोवृंदवीतः
॥ श्रीमद्वक्त्रारविंदप्रतिहसितशशांका
कृतिः पीतवासा देवेशो वेणुवाद्यक्ष
पितजनधृतिर्देवकीनंदनो वः ॥ १ ॥
मंत्रः ॥ क्लीं कृष्णाय गोविंदाय गोपीजन
वल्लभाय स्वाहा ॥ १८ ॥ मोक्षप्रधानोऽयं
मंत्रः ॥ विंशतिसहस्रं जपः ॥ अरुणकम
लैर्दशांशं होमः ॥ अथ मातृकान्यासं कुर्या
त् ॥ तथाह ॥ तत्रचतुर्धा ॥ प्रथमं शुद्धमातृ
कान्यासः ॥ द्वितीयस्तु सबिंदुकमातृका
न्यासः ॥ तृतीयस्तु सविसर्गमातृकान्या
सः ॥ चतुर्थस्तु बिंदुविसर्गोभयात्मको
मातृकान्यासः ॥ एवं मातृका चतुर्विध
न्यासं कृत्वा पुनरपि सप्तमपटलोक्तेन
मार्गेण कीर्त्यादिशक्तियुक्तैः केशवादिभि
र्न्यसेत् ॥ पुनस्तत्त्वन्यासं कुर्यात् ॥ तद्यथा
मं नमः परायजीवात्मने नमः । भं नमः परा
य प्राणात्मने नमः ॥ आभ्यां शिरआदिपादां
तं व्यापयेत् ॥ बं नमः परायबुद्ध्यात्मने नमः
। फं नमः परायअहंकारात्मने नमः । पं नमः
परायमनआत्मने नमः । इति गुह्यहृदि
न्यासः ॥ नं नमः परायशब्दतन्मात्रात्मने
नमः ॥ धं नमः परायस्पर्शतन्मात्रात्मने
नमः ॥ दं नमः परायरूपतन्मात्रात्मने न
मः ॥ थं नमः परायरसतन्मात्रात्मने नमः
तं नमः परायगंधतन्मात्रात्मने नमः
इति शिरोमुखहृद्गुह्यपादेषु न्यासः ॥ णं
नमः परायश्रोत्रात्मने नमः ॥ इति श्रोत्र
योः ॥ ढं नमः परायत्वगात्मने नमः इति
त्वचि व्यापकं ॥ डं नमः परायचक्षुरात्म
ने नमः दृशोः । ठं नमः परायजिह्वात्मने
नमः ॥ जिह्वायां ॥ टं नमः परायघ्राणात्म
ने नमः । इति घ्राणयोः ॥ ञं नमः परायवा
गात्मने नमः ॥ झं नमः परायपाण्यात्मनेन
मः ॥ जं नमः परायपादात्मने नमः ॥ छं नमः
परायपाय्वात्मने नमः ॥ चं नमः परायउप
स्थात्मने नमः ॥ इति वागादीनामास्यादिस्वस्व
स्थानेषु न्यासः ॥ ङं नमः परायआका

शात्मने नमः ॥ घं नमः परायवाय्वात्म

शात्मने नमः ॥ घं नमः पराय वाय्वात्म
ने नमः ॥ गं नमः पराय वन्ह्यात्मने नमः
खं नमः पराय अबात्मने नमः ॥ कं नमः
पराय पृथिव्यात्मने नमः इति शिरोमुख
हृद्गुह्यांघ्रिषु न्यसेत् । क्षं नमः पराय हृ
त्पुंडरीकात्मने नमः ॥ हं नमः पराय सू
र्यमंडलाय द्वादशकलात्मने नमः ॥ सं न
मः पराय सोममंडलाय षोडशकलात्म
ने नमः ॥ रं नमः पराय वन्हिमंडलाय
दशकलात्मने नमः ॥ इति चतुष्टयं हृ
दि विन्यसेत् ॥ षों नमः पराय परमेष्ठ्या
त्मने वासुदेवाय नमः ॥ यं नमः पराय पु
रुषात्मने संकर्षणाय नमः ॥ रां नमः प
राय विश्वात्मने प्रद्युम्नाय नमः ॥ वं नमः
पराय निवृत्यात्मने अनिरुद्धाय नमः ॥
लां नमः पराय सर्वात्मने नाराय ण
य नमः । एवं पंचतत्वानि शिरोमुख हृ
द्गुह्यांघ्रिषु विन्यसेत् ॥ क्ष्रौं नमः परा
य कोपतत्वात्मने नृसिंहाय नमः ॥ इ
ति मूर्धादि पादांतं व्यापयेत् ॥ एवं त
त्वन्यासः ॥ पुनः प्राणायामं कृत्वा
वैष्णव पीठन्यासं कुर्यात् ॥ गं गु
रुभ्यो नमः शिरसि । गं गणपतये
नमः मूलाधारे ॥ आधारशक्त्यै ॥
मूलप्रकृत्यै । आदिकूर्माय । अनंता
य । पृथिव्यै । क्षीरसमुद्राय ॥ श्वेत
द्वीपाय ॥ रत्नमंडपाय । कल्पवृक्षा
य । श्वेतछत्राय ॥ सितचामराभ्यां
रत्नसिंहासनाय ॥ एतान्मूलाधारा
दारभ्य उपर्युपरिक्रमेण हृदय पर्यंतं
विन्यसेत् ॥ धर्माय ॥ ज्ञानाय । वैरा
ग्याय ॥ ऐश्वर्याय ॥ एतान् दक्षि
ण पाद हस्त वाम हस्त पाद मूलेषु न्य
सेत् ॥ अधर्माय नमः । अज्ञानाय
अवैराग्याय । अनैश्वर्याय । एतान्
नाभि दक्ष पार्श्व आनन वाम पार्श्वेषु
न्यसेत् ॥ सं सत्वाय ॥ रं रजसे ॥ तं
तमसे ॥ मां मायायै ॥ विं विद्यायै ॥ प
अं अनंताय ॥ पं पद्माय । अं सूर्य
मंडलाय ॥ उं सोममंडलाय ॥ मं व
न्हिमंडलाय ॥ अं आत्मने ॥ उं अं
तरात्मने ॥ मं परमात्मने ॥ ॐ ह्रीं ज्ञा
नात्मने । एतान् मंत्रान् हृदि विन्यस
पुनः हृदये अष्टदलं संचिंत्य तेष्वष्टदले
षु प्रागादि क्रमेण ॥ विमलायै ॥ उत्क
र्षिण्यै ॥ ज्ञानायै ॥ क्रियायै ॥ यो
गायै । प्रह्व्यै । सत्यायै ॥ ईशानायै ॥ प

गायै। प्रभूत्यै। सत्त्वाय। ॥ इत्यानीय। प
ञ्चनुयहासै॥ एताः पञ्चदलेषु न्यस्त
व्याः॥ नवमीं कर्णिकायां च न्यसेत्।
पुनः ॐ नमो भगवते विष्णवे सर्वभू
तात्मने वासुदेवाय सर्वात्मसंयोगयो
गपद्मपीठात्मने नमः॥ इत्यासनमं
त्रं॥ च कर्णिकायां न्यसेत्॥ एवं पी
ठन्यासं कृत्वा समावाह्य तत्कर्णि
कायां मूर्तिं तेजोरूपेण संभाव्य। तत्प
रमकं ज्योतिर्मूलेन व्यापकांगं ऋष्या
दिना सकलीकृत्य॥ ऋषिवक्त्रविधानेन व
र्ण्यमालाक्रमेण प्राणप्रतिष्ठां कृत्वा।
मानसपूजां प्रकृत्य सप्तमपटलोक्तप्रकारे
ण कुर्यात्॥ पुनः दशाक्षरीमंत्रेण प्रण
वपुटितेन हस्ततलद्वयं तयोर्द्वयोः पार्श्व
योश्च व्यापयेत्। पुनः दशाक्षरीमंत्रव
र्णैर्दशभिः राद्यंतप्रणवैर्नमोंतैरंगुलि
षु दशसु दक्षिणांगुष्ठादि वामांगुष्ठांतं
सृष्टिन्यासः॥ तत्र दक्षिणांगुष्ठस्य मू
लपर्वणि प्रथमं प्रणवः॥ द्वितीयपर्वणि
मंत्रप्रथमवर्णः सानुस्वारः॥ तृतीयप
र्वणि द्वितीयः प्रणवः॥ अग्रे नम इति।
तृतीयपर्वण्येव वा॥ एवमेव सर्वास्व
प्यंगुलिषु क्रमेण सृष्टिन्यासं कृत्वा।
पुनर्दक्षिणांगुष्ठादि तत्कनिष्ठिकांतं
कृत्वा वामांगुष्ठादि तत्कनिष्ठिकांतं च तथै
व कुर्यात्॥ एवं स्थितिन्यासः॥ पुनः
वामांगुष्ठादि तत्कनिष्ठिकांतं कृत्वा द
क्षिणकनिष्ठिकादि तदंगुष्ठांतं च कुर्यात्
एवं संहारन्यासः॥ पुनरपि सृष्टिस्थिती
कुर्यात्॥ पुनर्दशाक्षरीमंत्रस्य वर्णैः स
बिंदुकैः दक्षिणांगुष्ठादि वामांगुष्ठांतं मं
त्रं करन्यासरूपेण। गों नम इत्यादिक्र
मेण न्यस्य पुनर्दशाक्षरीमंत्रस्य दशांगैरा
चक्राय स्वाहा इत्याद्यैः पंचांगैश्च वल्लभमा
लोरुभयोरपि करयोः करन्यासरूपेणांगु
ष्ठाभ्यां नम इत्यादिक्रमेण कुर्यात्॥ पुनः
दशाक्षरीमंत्रेण मातृकावर्णानेव सबिंदु
कान् एकैकं क्रमेण पुटित्वा पूर्ववन्न्यसेत्।
पुनः दशतत्त्वन्यासं वक्ष्ये। गों नमः परा
य पृथिव्यात्मने नमः पादयोः॥ पीं नमः
पराय अबात्मने नमः गुह्ये॥ जं नमः प
राय तेजात्मने नमः हृदये॥ नं नमः प
राय वाय्वात्मने नमः मुखे॥ वं नमः प
५ शिरे= राय आकाशात्मने नमः॥ लं नमः पराय
अहंकारात्मने नमः हृदि। भां नमः पराय
बुध्यात्मने वा महदात्मने नमः हृदि॥ यं न
मः पराय प्रकृत्यात्मने नमः व्यापकं॥ सों
नमः पराय पुरुषात्मने नमः व्यापकं। हां
नमः [illegible] कं॥
एवं संहारन्यासः॥ मंत्राश्च स्थानानि च

मः पराय प्रकृत्यात्मने नमः व्यापकं ॥ ह्रां
नमः पराय पुरुषात्मने नमः व्यापकं ॥ ह्रीं
नमः पराय परमात्मने नमः व्यापकं ॥
एवं संहारन्यासः ॥ मंत्रोश्च स्थानानि च
एतद्विपरीतक्रमेण संयोज्य सृष्टिन्यासं
कुर्यात् ॥ इति दशतत्त्वन्यासः ॥ पुनः
प्रथमं प्रणवपुटितेन दशाक्षरी मंत्रेण
मूर्धादि पादांतं निक्षिप्य । पुनः दशाक्ष
रीमंत्रस्याऽक्षरन्यासं कुर्यात् ॥ शिरः १ ने
त्रे २ कर्णयोः ३ घ्राणे ४ मुखे ५ हृदये ६ जठ
रे ७ शिवे ८ जानु ९ पादयोः १० ॥ एष्वक्ष
राणि न्यसेत् ॥ तत्र प्रथमं मूर्धादि पादां
तो न्यासः सृष्टिः ॥ पुनः हृदयादि क्रमे
ण पादांतं सृष्टिक्रमेण न्यासस्य अवशिष्टैः
पंचभिः वर्णैः शिरआदि मुखांते न्यसेत्
एषा स्थितिः ॥ पुनरंघ्र्यादि मूर्धांतं
संहारन्यासक्रमः ॥ एवं कृत्वा पुनर
पि सृष्टिस्थिती कुर्यात् ॥ अथ विभूति
पंजरन्यासः ॥ स तु अस्यैव दशाक्षरी
मंत्रस्य दशकृत्वो न्यासः ॥ तस्य स्था
नानि उच्यंते ॥ आधार १ ध्वज २ नाभि ३
हृद् ४ गल ५ मुख ६ अंस ७ उरुद्वये ९
कंधरं नाभि १० ॥ ~~[illegible]~~
३ कुक्षि हृदोरुरोज युगले पार्श्वौ परं श्रो
णि पु ॥ कास्यौ द्वे श्रुति नः कपोल
करपतं संध्यग्र शाखां सुके तस्मा
च्चादि दिशासु मूर्धि सकले दोषो
श्च सकृद्योस्तथा ॥ शिरोन्यासे
कर्णास्य हृत्तुंद कं संधु जानु
प्रपेत्तिरत्यमणि मनूत्यानु । न्यासे
कोण गंडांसे वृत्तौ गुज पार्श्व स्फिग्गू
रुस्थली जानु जंघा घ्रि युक्ते ॥ इति
तत्र ध्वजमिति लिंगं ॥ कंधर कंठः ॥ अ
परं पृष्ठः । नइति नासिका । अंधुगुह्यं
स्फिक् जघनः । सक्थि ऊरुमूलं ॥
कंदं नाभिः । तत्राधारादि ऊरुद्वयप
र्यंतं प्रथमो न्यासः ॥ कंधरादि श्रो
णिपर्यंतं द्वितीयः ॥ कास्यादि कपोल
पर्यंतं तृतीयः ॥ दक्षिण करसंध्यग्रे
षु तच्छाखासु च चतुर्थः ॥ वामेपि तथैव
पंचमः ॥ पादद्वय संध्यग्रेषु च तच्छा
खासु च तथैव षष्ठसप्तमौ ॥ शिरआदि
ऊर्वंतमष्टमः ॥ तत्र क्रमविशेषस्तु ।
पूर्वं शिरसि ॥ पुनः शिरसः आद्यादि
चतुर्दिक्षु ॥ पुनः शिरस्येव वेष्टनाकारे
ण सर्वदेशे ऊर्वादि पाददये च सकले
व्यापकरूपेण इति ॥ पुनः शिरआ
दि पादांतं नवमः ॥ आधारादि ब्रह्मरंध्र
पर्यंतं दशमः ॥ एवं दशविधन्यासं च

दिपादांतनवमः॥ श्रोत्रादि भ्रूद्वय
पर्यंतं दशमः॥ एवं दशविधन्यासं कृ
त्वा पुनः मूर्तिपंजरन्यासं कुर्यात्॥
ॐ अं ॐ कृष्णवर्णाय अंगकेशवाय
नमः॥ भाले॥ ॐ आं नं कनकवर्णा
य अर्यम्णे नारायणाय नमः उदरे॥
ॐ ईं मों श्यामवर्णाय मित्राय माधवा
य नमः हृदि॥ ॐ ईं भं कर्पूरवर्णाय
वरुणाय गोविंदाय नमः गले॥ ॐ उं
गं रक्तवर्णाय अंशवे विष्णवे नमः
कूपतले॥ ॐ ऊं वं धूम्रवर्णाय भगाय
मधुसूदनाय नमः वामेतरपार्श्वे॥ ॐ
ऋं तें हरितवर्णाय विवस्वते त्रिविक्रमा
य नमः भुजांसे॥ ॐ ॡं वां पिंगल
वर्णाय इंद्राय वामनाय नमः गले॥
ॐ ऐं सुं श्यामवर्णाय पूष्णे श्रीधराय
नमः गलादि पार्श्वे वर्तिनि॥ ॐ ओं दं चि
त्रवर्णाय पर्जन्याय हृषीकेशाय नमः
वामस्कंधाधःस्थले॥ ॐ औं वां पांडु
रवर्णाय त्वष्ट्रे पद्मनाभाय नमः वाम
पार्श्वे॥ ॐ अः यं अंजनवर्णाय विष्ण
वे दामोदराय नमः पृष्ठे॥ ॐ अं आं न
मो भगवते वासुदेवाय अंत्येभ्यो नमः ककु
त्सु॥ तथा मूर्धन्यपि॥ इति मूर्तिपंजरः॥
ततोनंतरं वक्ष्यमाणैः पंचांगमंत्रैः कर
द्वंद्वे अंगुलिषु विन्यसेत् पुनरष्टादशाक्षरी
मंत्रेण त्रिवारं मूर्धादि पादांतं व्याप्य प्रणवे
नाप्येकवारं व्याप्य पुनरष्टादशाक्षरी मंत्र
वर्णान् पदानि च वक्ष्यमाणस्थानेषु सबिं
दुकान् नमोंतान् च विन्यसेत्॥ शिरो ल
लाट भ्रूयुग्मांतर श्रवणद्वितयनोयुगलवद
न [illegible] भगं धस्व। सुमहि
स्फिग्धी जानुं च श्रोरतस्तान् [illegible]
नयनमुखहृत् गुल्फांघ्रि अर्पयेत् पदपं
चकमिति॥ श्रवणादि द्वंद्वस्थाने पुष्प
[illegible] कं अंधुराचे जानुं च श्रोत्रे केकं॥
एवं वर्णन्यासः॥ अवशिष्टेन पदन्या
स उक्तः॥ तुगधुवमिति सर्वत्र प्रणवः।
अंगकामबीजं वा। लक्ष्मीं वा विन्यसेत्
पुनरष्टादशाक्षरं वक्ष्यमाण पंचांग
[illegible] पदि भजन [illegible] नादि पंचस्थाने
पु पंच पदानि विन्यसेत्॥ पुनरष्टा
दशाक्षरी मंत्रस्य पंचांगानि कुर्या

गलश्रवयोः॥

वामः
ऊर्ध्वः

स्तउक्तः॥ नगभुवमातः सर्वत्र प्रणवं॥
त्रगकामबीजं वा. तर्द्धिरश्मि विन्यसेत्.
पुनरज विष्टे नं पौ दस माला यं चांग
ऋषि च दि भजन न पुना दि पंच स्थाने
षु पंच पदानि विन्यसेत्॥ पुनरस्या
ष्टादशाक्षरी मंत्रस्य पंचांगानि कुर्या
त्॥ क्लीं कृष्णाय हृदय॥ गोविंदाय शि
रः॥ गोपीजनशिखा॥ वल्लभाय कवचं.
स्वाहा अस्त्रं॥ श्रीनारद ऋषिः॥ गाय
त्री छंदः॥ श्रीकृष्णो देवता॥ एवमंग
न्यासादीन् विधाय बीजन्यासादीन् पूर्वोक्त
दशाक्षरी विधानोक्त प्रकारेण कृत्वा
किरीटादि मुद्राश्च बध्वा सुदर्शने
न दिग्बंधनं कृत्वा. अंशुमान्मीलत्क
लायेत्यादिना ध्यात्वा जपेत्॥
अष्टादशाक्षरी मंत्रश्चैव अमुत्त
दय संलक्षमेवाऽय पंचलक्षं पु
रश्चरणं कृत्वा त्रिमधुरसिक्तैः सरो
रुहाजमधुमेलन सिक्तैः अरुणां
बुजैरेव पंचाशत सहस्र संख्याहु
ति... अंबुजानामलाभे पायसैर्घृ
तसि... सहितैः स्त संख्या उभयोर्म
नयो होम... होमः शाक्तश्चैव जप
... सर्वेषां जपेत्॥

॥ [illegible] दशाक्षरीमंत्रप्रयोगः ॥

नं ६७



अथवारत्तिगये॥ समर्चयेत्॥ अंगैः अथ
मारत्तिः॥ इंद्रादिभिर्द्वितीया॥ वज्रादिभिस्तृ
तीया॥ एवमावृत्तित्रयं॥ अथवा कृष्णापू
केन पूजां कुर्यात्॥ श्रीकृष्णायनमः॥ वासुदे
वाय॥ नारायणाय ३ देवकीनन्दनाय ४ यदु
श्रेष्ठाय ५ वार्ष्णेयाय ६ असुराक्रांतभूभा
रहारिणे ७ धर्मसंस्थापनाय ८ एतैरष्टभिः
शण्वाद्यैर्नमोंतैर्जलगंधादिभिः समर्चयेत्॥
इतिपूजनप्रकारः॥ ॐ अमृते अमृतोद्भवे
अमृतेश्वरि अमृतं वर्षिणि अमृतंश्रावय श्रा
वय स्वाहा॥ इत्यनेन मंत्रेण सुरभिमुद्रां
प्रदर्श्य तन्निवेद्यं पवित्रं कृत्वा पुनस्तन्नि
वेद्यमर्चयेत्॥ गंधपुष्पाद्यैः पुनर्हरिमपि
पुष्पैः समभ्यर्च्य॥ पुनरुद्धृतपुष्पहस्तः समू
लमंत्रं स्वाहांतमुच्चरन् तस्य देवस्य मुखात्
तेज आनीय निवेद्ये निक्षिपेत्। पुनर्जलं दत्वा
तदमृतात्मकं हविरर्चयेत्। पुनर्दीर्घजासगं
धान्तं कुसुममुद्धरन् इमं मंत्रं जपन् निवेदया
मि भवते जुषाणेदं हविर्हरे इति जपन् पुष्पे
ण राघव पश्चान्निवेदयेत्॥ जुषाणेदं हविर्ह
रे इत्यत्र तत्र देवता ख्याया जपेत्॥ पुन
र्वामदेवेन ग्रासमुद्रां विकचोत्पलसन्निभां
प्रदर्शयन् दक्षिणहस्तेन प्राणमुद्राः ५
प्रदर्शयेत्॥ तत्प्रकारः विंशाख्यतरीविधा
ने द्रष्टव्यम्॥ इति देवता निवेद्य प्रकारः॥
अथ केशवादिमातृकान्यासः॥ अं केशवाय कीर्त्यै नमः
आं नारायणाय कांत्यै नमः॥ इं माधवाय तुष्ट्यै नमः
गोविंदाय पुष्ट्यै नमः। विष्णवे धृत्यै॥ मधुसूदना
य शांत्यै। त्रिविक्रमाय क्रियायै। वामनाय दयायै।
श्रीधराय मेधायै॥ हृषीकेशाय हर्षायै। पद्मना
भाय श्रद्धायै। दामोदराय लज्जायै। वासुदेवाय
लक्ष्म्यै। संकर्षणाय सरस्वत्यै। प्रद्युम्नाय प्रीत्यै।
अनिरुद्धाय रत्यै। चक्रिणे जयायै। गदिने दुर्गा
यै। शार्ङ्गिणे प्रभायै। खड्गिने सत्यायै। शं
खिने चंडायै। हलिने वाण्यै। मुसलिने विलासि
न्यै। शूलिने विजयायै। पाशिने विरजायै।
अंकुशिने विश्वायै। मुकुंदाय विनदायै। नंद
जाय सुनंदायै। नंदिने स्मृत्यै। नराय ऋद्ध्यै।
नरकजिते समृद्ध्यै। हरये शुद्ध्यै। कृष्णाय बु
द्ध्यै। सत्याय भुक्त्यै। सात्वताय मत्यै। शौरये
क्षमायै। शूराय रमायै। जनार्दनाय उमायै।
भूधराय क्लेदिन्यै। विश्वमूर्तये क्लिन्नायै।
मं वैकुंठाय वसुदायै। यं त्वगात्मने पुरुषोत्तमाय
वसुधायै। रं असृगात्मने बलिने परायै। लं मां
सात्मने बलानुजाय परायणायै। वं मेदसात्मने
बलाय सूक्ष्मायै। शं अस्थ्यात्मने वृषघ्ना
य संध्यायै। षं मज्जात्मने वृषाय प्रज्ञायै।
सं शुक्रात्मने हंसाय प्रभायै। हं प्राणात्मने व
राहाय निशायै। लं शक्त्यात्मने विमलाय अ
मोघायै। हं ग्रात्मात्मने नृसिंहाय विद्युता
यै। क्षं क्रोधात्मने नम इति क्रमशो विन्यकार
मले॥ इति मातृकान्यासार्थं केशवादि॥
अथ पतुष्ठ्या जलार्थं शालिग्राममंत्रः॥ साधना
रायण ऋषिः। अनुष्टुप् छंदः। लक्ष्मीनारायणो देव
श्री बीजं। ह्रीं शक्तिः। सौः कीलकं। ममसर्वाभीष्ट
सिध्यर्थे विनियोगः॥ ॐ नमो भगवते हृदय। विष्ण
वे शिरः। शालग्रामनिवासिने शिखा। सर्वाभीष्ट
फलप्रदाय कवचं। सकलदुरितनिवारिणे नेत्रं।
शालग्रामाय स्वाहा अस्त्रं॥ ध्यानं॥ तुलसप्रभं
तवनसाविभिरत्नचक्रकौमोदकीदरविराजित
पाणिपद्मं॥ लक्ष्मीमहीसहितमाश्रितविश्वभूयं
नारायणं कपिशवास समाश्रयामि॥ १॥ ॐ नमो
भगवते विष्णवे श्रीशालग्रामनिवासिने सर्वाभी
ष्टफलप्रदाय सकलदुरितनिवारिणे शालग्रा
माय स्वाहा॥ इति मंत्रः॥ अनेनापि सर्ववैष्णव
जपपूजादिषु पुष्पांजलिप्रदानं नवभ्य क
तेभ्यः॥ मंत्रसान्निध्यार्थम्॥ इति॥

॥ दरदरूपाद्व नश्रावः॥

2nd

मकारं एवं सविंदुकमुच्चार्य अभीष्ट
मंत्रं जपेदित्येको जपः॥ पुनः आमिति स
बिंदुकः पुनरभीष्ट मंत्रः॥ एवं द्वितीयो
जपः॥ एवं क्रमेण लमित्यंतं जपेत्॥ एवं
कृते पंचाशदक्षरं जायते॥ पुनः लकारं
मेरुस्थानीयं मंत्ररहितं केवलं जपेत्॥
पुनः प्रतिलोमार्थं पूर्वं मंत्रं जपेत् तन्मे
ग्रांते लकारं विसर्गांतं उच्चरेत्॥ पुनरपि
मंत्रः॥ तदंते च हकारं विसर्गांतमुच्चरेत्॥
पुनरपि मंत्रः॥ एवमकारांतं जपः कर्तव्यः॥
तन्नाष्टोत्तरशतसंख्यापेक्षायां क्षादि
वर्गाष्टकेन वा पंचमवर्गादियादित्यली
यांते वैरैरष्टभिर्वा संयोजयेत्॥ एव
मनुलोमविलोमक्रमेण मातृकाक्षरमा
लया जपः कर्तव्यः॥ एवं जपतः सर्वे मं
त्राः सिद्धिसिध्यंति॥ इतीमत्ता सकल
जगद्धा भाविनी क्रमोत्क्रमात्तगणित
मातृवर्णमालिका॥ अभीष्टसाधन
विधये च मंत्रिणां भवेन्मनुप्रतिपुष्टि
तां च मालिका॥११॥ अस्यार्थः उपदि॥

अथ पूजार्थयंत्रमुच्यते ॥ प्रथमं षट्
कोणं विलिख्य तत्कर्णिकायां काम
बीजं विलिख्य साध्यनामादि यं अ
न्वायान् विलिख्य षट्सु कोणेषु
कामबीजं विलिख्य कोणेषु श्रेष्ठ
गोपाल षडक्षरी मंत्रस्य क्लीं कृष्णा
य नमः इत्यस्य एकैकमक्षरं विलि
ख्य तद्बहिः दशदलं पद्मं विलिख्य त
स्य केसरेषु भुवनेशी लक्ष्मी बीजपू
र्वकाष्टादशाक्षरीवर्णान् ह्रीं श्रीं क्लीं
कृष्णायेत्यादीन् द्वौ द्वौ विलिख्य
दशदलमध्येषु गोपीजनवल्लभाय स्वा
हेति दशाक्षरी वर्णानामेकैकं विलिखेत्
तत्र दशाक्षरीयंत्र प्रधानेन चेदेवम् अ
ष्टादशाक्षरीयंत्र प्रधानेन चेदन्यथा
॥ कथं ॥ केसरेषु दशाक्षरी मंत्र वर्णान्
दलेषु अष्टादशाक्षरी मंत्र वर्णान् शक्ति
श्री काम बीजादि क्रमेण विलिखेत्
एकं उभयोरपि मंत्रयोर्विशेषः ॥ पुनस्त
द्बहिः अष्टदलं विलिख्य तत्कोणेषु का
मबीजं विलिखेत् ॥ एवमुक्तेन प्रकारेण
सेपूजनफले उक्तफलं भवति । गोरोचने
न सुवर्णपट्टे तपनीयसूच्या लिखेत्
इति वैष्णवपीठं संपूज्य तस्मिन्नेतद्यं
त्रं संभाव्य तस्मिन् दशाक्षरी मूर्तिं अ
ष्टादशाक्षरी मूर्तिं वा तत्तन्मूलमंत्रेण
समावाह्य आवरणैः सह समर्चयेत् ॥
प्रथमं मूलदेवतायाः अंगन्यासं कुर्यात्
~~[illegible]~~ ॥ पुनः वदने वेणुं चतु
र्थ्यंतेन समर्चयेत् ॥ वक्षोदेशे वनमालां च
तुर्थ्यंतेन ॥ दक्षिणस्तनस्योर्ध्वदेशे श्री
वत्साय नमः ॥ कौस्तुभरत्नाय नमः कंठे ॥
एवं अवयवस्था देवताः समर्चयेत् ॥ ॐ क्लीं
गुणत्रयात्मने वर्हापीडाय नमः । ॐ क्लीं दिव्
सात्मने उत्तंसाय नमः । ॐ क्लीं साविद्यात्मने
तिलकाय नमः ॥ ॐ क्लीं शब्दादि विषयात्मभ्यां
मकरकुंडलाभ्यां नमः ॥ एवं ललितादि रागा
त्मभ्यां कर्णावतंसाभ्यां नमः । वर्णाद्यात्मने ग्री
वावतंसाय । व्याहृत्यात्मने स्कंधाभरणाय ।
पंचतन्मात्रात्मने पदकाय । विज्ञानादि विष
यात्मभ्यां केयूराभ्यां नमः । अणिमाद्यात्मभ्यां
हस्तकटकाभ्यां नमः । कर्मेन्द्रियात्मभ्यः
अंगुलीयेभ्यो नमः । शब्दब्रह्मात्मने वेणवे
नमः । उदात्तादि स्वरात्मने नादाय । पंचत
न्मात्रात्मने वनमालायै नमः । प्रकृत्यात्मने
श्रीवत्साय । पुरुषात्मने कौस्तुभाय । नागा
दि विषयात्मभ्यः संधिबंधेभ्यो नमः । मंत्रात्म
ने कुक्षिबंधाय । प्राणादि वाय्वात्मने नाभि
कमलाय ॥ दिगात्मने पीतांबराय ॥ ग्रं
थात्मने कटिसूत्राय ॥ गंधर्वात्मभ्यां जानुजं
घायुगलाभ्यां ॥ ऋग्यजुः सामात्मभ्यः क
रकांदुकनूपुरेभ्यो नमः । [illegible]कलात्मने
तिलकलाय ॥ एवं वर्हापीडादि मंत्रैर्देवस्य
श्रीकृष्णस्य देहे तत्तत्स्थाने समर्चयेत् ॥

मकरकुंडलाभ्यां नमः॥ एवं ललितादिरागा
त्मभ्यां कर्णावतंसाभ्यां नमः। वर्णात्मने ग्री
वावतंसाय॰१ व्याहृत्यात्मने स्कंधाभरणाय॰
पंचतन्मात्रात्मने पदकाय। विज्ञानादि विष
यात्मभ्यां केयूराभ्यां नमः। अलिमायात्मभ्यां
हस्तकटकाभ्यां नमः। कर्मेन्द्रियात्मभ्यः
अंगुलीयेभ्यो नमः। शब्दब्रह्मात्मने वेणवे
नमः। उदात्तादि स्वरात्मने नादाय॰। पंचत
न्मात्रात्मने वनमालायै नमः। प्रकृत्यात्मने
श्रीवत्साय॰। पुरुषात्मने कौस्तुभाय॰। वागा
दि विषयात्मभ्यः संधिबंधेभ्यो नमः। मंत्रात्म
ने कटिबंधाय॰। प्राणादि वाय्वात्मने नाभि
कमलाय॰॥ दिगात्मने पीतांबराय॰॥ यंत्रि
तात्मने कटिसूत्राय॰॥ गंधर्वात्मभ्यां जानुजं
घांगुलाभ्यां॥ ऋग्यजुः सामात्मभ्यः क
रकांदुकनूपुरेभ्यो नमः। अव्याकृतात्मने
विल्वकलाय॰॥ एवं वंद्यहीपीठादिमंत्रैर्देवस्य
श्रीकृष्णस्य देहे तत्तत्स्थाने षु समर्चयेत्॥
पुनः मूलमंत्रेण जिवारंजनलगंधपुष्पैर्देवं स
मर्च्य पुनरावरणदेवताः समर्चयेत्॥ ओं क्ली
दामाय नमः। सुदामाय नमः। वसुदामाय॰।
किंकिणीदामाय॰। एताः मूर्ती तेजोरूपतया
ध्यात्वा पूर्वादि दिक्षु समर्चयेत्॥ एवं प्रथमा
वृत्तिः॥ पुनस्तद्बहिः केसरेषु मूलमंत्रस्य षडंग
पंचांगैः ओं क्लीं कृष्णाय हृदयाय नमः नेत्र
रहित इत्यादिभिर्द्वितीयावृत्तिः॥ तत्राग्नेया
दिषु हृदयादि चतुष्टयं। दिक्षु ऽस्त्रं॥ पुनस्त
द्बहिर्दलमध्येषु रुक्मिण्यायुऽष्टमहिषीः
समर्चयेत्॥ रुक्मिण्यै॰। सत्यभामायै॰॥
नाग्नजित्यै३ सुनंदायै४ मित्रविंदायै५ सु
लक्ष्मणायै६ जांबवत्यै॰७ सुशीलायै॰८ इति
पूर्वादि दिक्षु तृतीयावृत्तिः॥ एतासामायुधरो
चीषु चैतत्॥ दक्षिणकरधृतकमलाः समभि
तसुपात्रसुधृतान्यकराः॥ तपनीयमरकता
भाः सुसितविचित्रांबरादिशोभिताः॥ वधूक
चभरान्तसंगता विविधमणिप्रकरविलसिता
भरणा इति॥ पुनर्दलाग्रेषु प्रागादि दिक्षु॥
वसुदेवाय नमः॥ नंदगोपाय॰ १ बलभद्राय॰
गोपेभ्य इति समर्चयेत्॥ पुनराग्नेयादिषु॰
देवक्यै॰। यशोदायै॰। सुभद्रायै॰। गोपीभ्य॰
इति समर्चयेत्॥ एते पार्श्वयोः पादयुग्मं च
ते॥ तानमुद्राभयकरौ पितरौ पीतपांडरौ
दिव्यमाल्यांबरालेपभूषणे मातरौ पुनः॥ धा
रयंत्यौ च वरदं पयसा पूर्णपात्रिका॥ अरु
णश्यामले हारमणिकुंडलमंडिते। बलः
शंखेंदुधवलो मुसलं लांगलं दधत्॥ हाला
लोलो नीलवासा हेलावानेककुंडलः॥ कि
कलाय श्यामला भद्रा सुभद्रा भद्रभूषणा॥
वराभययुता पीतवसना रूढयौवना॥ वेणु
ध्यं॰ वीणावेत्रयष्टिशंखशृंगादिपाणयः॥ गो
पा गोप्यश्च विविधप्रसूनात्तकरांबुजाः इ
ति॥ एवं चतुर्थ्यावृत्तिः॥ पुनर्मंदारकादि
कल्पवृक्षांश्च तद्बहिः समर्चयेत्॥ मंदा
राय नमः। संतानकाय नमः। पारिजाताय॰
कल्पद्रुमाय॰। इति पूर्वादि चतुर्दिक्षु॥ हरि
चंदनाय नम इति मध्ये॥ इति पंचमी॥
पुनरिंद्रादिभिः षष्ठी॥ वज्रादिभिः सप्तमा
वृत्तिः॥ एवं सप्तावरणैरभ्यर्चयेत्॥